- Title – अज्ञात
- Accession No – Title – '
- Accession No –
- Folio No/ Pages – 18/36
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – तया गमनाभिन्नाभावस्य केवला-न्वयि – – .
- End – धूमादिव्याप्यो घटत्वादिना घटत्वादित्व विशिष्ट – –
- Colophon-
- Illustrations -
- Source -
- Subject - न्याय सम्बन्धित
- Revisor -
- Author -

1. Remarks- अपूर्ण

Pallavi Singh

६ तथा गगनभिन्नाभावस्य केवलान्वयित्वोपपत्तेः वन्हित्वावच्छिन्नघटादिनिष्ठप्रतियोगितायां वन्हि गितापा २
निष्ठतादृशप्रतियोगित्वाभेदे वन्ह्यादिमति वन्हित्वादिना घटाद्यभावसत्वानुपपत्त्या उक्तरीत्यानैक
प्रतियोगित्वासंभवः एवं च गगनत्वावच्छिन्नैव प्रमेयत्वसमनियताप्रतियोगिता प्रसिद्धेति (1)
तिभावः उक्तविशेषणानामपेवावृत्तिमात्रवृत्तित्वात्कीर्तनम् ननु एवमपि यत्र विषयितासं
संबंधेन प्रमेयसामान्यं साध्यं ईश्वरज्ञानत्वादिकं हेतुस्तत्र सत्तावान् जातेरित्यादौ साध्याभावकूटवतिहे
२णा तुतावच्छेदकसंबंधेन वृत्त्यप्रसिद्ध्याऽव्याप्तिर्वा योपापादेयसाध्य नसामानाधिकरण्यरूपविशेषणे
क्रांतसाध्यतावच्छेदकसमनियतसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रसि
द्धिः गगनादेरपि विषयितासंबंधेन ईश्वरज्ञानादिसंबद्धत्वात् तादृशसंबंधेन गगनत्वादिना
न्या प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यासंभवात् इत्यतोऽभावांतरमाह विरुद्धेति
येन संबंधेन घटत्वपटत्वाद्योर्विरोधस्तत्संबंधावच्छिन्नतदुभयानिष्ठप्रतियोगितावच्छेद

वह्निर्नास्तीति प्रतीतिसिद्धवह्निमात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासते इत्युच्य
ते प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमेऽपि वह्निर्नास्तीत्यादावपि तादृशप्रतीतिसिद्ध
निखिलप्रमेयनिष्ठप्रतियोगितायाः वह्नित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमासंभवात्
समानाधिकरणधर्मावच्छिन्न वह्नित्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वह्निभिन्नत्वादिना
वच्छिन्नाभावीयवह्निमात्रवृत्तिप्रतियोगितामादाय वह्निमान्प्रमेयत्वादित्यादावतिव्याप्त्या
पत्तेरित्युच्यते तदा तादृशाभावस्यानोक्तरूपतेत्याशंकाभावात् [illegible]इति अवृत्तिमत्त

त्व

इति गगनं नास्तीत्यत्र गगनसामानाधिकरण्येन यद्गगनत्वावच्छिन्नप्रतियोगिता प्रतीयते
सैव गगनत्वेन गगनाभिन्नं नास्तीत्यादौ गगनाभिन्नत्वादिसामानाधिकरण्येन प्रतीयते अव
च्छेदकैक्येऽप्रतिवापके प्रतियोगिताया ऐक्यस्वीकारात् गगनभिन्ननिष्ठप्रतियोगितायाः
गगनवृत्तित्वेऽपि गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनोऽवृत्तित्वे गगन

७

निवर्त्तेर्व्यधिकरणधर्मावच्छिन्नाभावत्वेन पर्याप्तं स्यादिति तिद्यत्तत्राह प्रागभावे ...यति
नन्वित्यादिना पारिभाषिकमिति तान्त्रिकसंकेतरूपपारिभाषिकव्याप्तिप्रतिपादकं ननु पो
गेनेत्यर्थः अव्यभिचरितत्वम् अव्यभिचरितत्वपदम् अपकपारिभाषिकमव्यभिच
रितत्वम् पारिभाषिकव्याप्तिवाचितत्वपदप्रतिपाद्यम् व्याप्यत्वमिति विशेषः ननु योगेन
तत्तत्पदलभ्यमित्यर्थः तथा च व्याप्तिचापरके साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य
व्याप्तिघटकत्वविरहेऽपि नक्षतिरिति भावः पदेति यत्पदं यद्रूपावच्छिन्नपरम् अपेत्त
तत्पदं तद्धर्मावच्छिन्नपरं सच धर्मो हेतुतावच्छेदकीभूतधूमत्वादिः स च स्थले हेतुतावच्छे
दकावच्छिन्नसमानाधिकरणं साध्यतावच्छेदकेत्यादिविशेषणं क्रान्ते व्यधिकरणधर्माव
च्छिन्नप्रतियोगिताकघटत्वादिनावह्न्यभावादिवत्तस्य च प्रतियोगिसमानाधिकरणत्वे
माव्यापकम् इति न [illegible] सत्पक्षमन्वयः व्यभिचारित्वं व्यभिचारनिरूपकाधिकरणीभूत
हेत्वधिकरणे साध्यतावच्छेदकेत्यादिविशेषणक्रान्तः साध्यतावच्छेदकावच्छिन्नप्रतियो

3

राम

भाव

कता[illegible]क प्रमेयसामान्याभावादृत्यर्थः प्रतियोगितावच्छेदकतावच्छेदकोभयत्वविशिष्टघटत्व
पटत्वाद्यवच्छिन्नप्रतियोगिकोऽप्रतिद्धा विरोधिविरहित्याभावस्य केवलान्वयितित्पवधे
यम् इदमुपलक्षणम् व्यधिकरणधर्मावच्छिन्नत्वादीनां प्रतियोगितावच्छेदकोरूपेतोवता तावच्छेदक
दृशसंबंधेनाप्यवच्छेदकस्य वृत्तिमत्तायाश्चावच्छेदकतायामतंत्रत्वात् समवायादिसंबंधेन
गगनावच्छिन्नप्रमेयसामान्याभावस्यापि केवलान्वयित्वम् अन्यथा भावस्यैवात्यन्ताभा
वस्यापिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्याप्रसिद्धत्वात् प्रमेयसामान्यस्यपत्रता

तादात्म्यसंबंधेन प्रमेयमान् वा स्मभात्

दात्म्येनसाध्यता तत्रघटत्वपटत्वाभ्यां समवायेनगगनत्वादिना वा प्रमेयसामान्यभे
दोलक्षणघटकः प्रतियोगितावच्छेदकावृत्ति समवायित्वाद्यवच्छिन्नप्रमेयसामान्यभेदो (
[illegible] वात पर्यवधेयम् (
ननुव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धाववपिव्याप्तिचाराभावलक्षणव्याप्तौ साध्यता
वच्छेदकावच्छिन्नसाध्याभावस्य घटकतया ^प्र^ तिद्धिनिवंधनाव्याप्तेरुद्धरतयेव वादिनो

धूमसामान्याभावस्य १

गिताकसाध्याभावादिरूपितस्य प्रतियोगिसामानाधिकरण्याभावात् तादृशाभावस्य
प्रतियोग्यधिकरणे कालिकसंबंधेन वृत्तावपि विवक्षणे प्रमेयस्यैव विशिष्टघटाद्यधिकरणं
तस्यैव प्रतियोगिसामानाधिकरण्यविरहात् नातिव्याप्तिः अयमात्मा ज्ञानादित्यादौ समा
नाधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावादिमादायाव्याप्तेर्वारणाय हेतुतावच्छेद को
विशिष्टसामानाधिकरण्यमभावे विशेषणम् अभावस्य वृत्तौ संबंधभेदानिवेशेन वह्निमा
न्धूमादित्यादौ वह्नित्वादिना वन्ह्याद्यभावस्य प्रतियोगिमति पर्वतादौ कालिकसंबंधेन वर्त्तेर्ल
क्षणसमन्वयसंभवात् न तत्रास्याव्याप्तेर्वारणं तत्फलमिति तु ध्येयम् अयमात्मा द्रव्यत्वव्या
पकान्यत्वे सति द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नाभावत्वाद्यभावा
नां प्रतियोगिसामानाधिकरण्यविरहाद्व्याप्तिरतो हेतुसामानाधिकरण्यघटके हेतौ हेतुता
वच्छेदकविशिष्टत्वनिवेशः यद्यप्ययमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्ना
भावमादायाव्याप्तिरभावे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यविशेषणेनापि
वारयितुं शक्यते धूमवान्वह्नेरित्यादौ धूमादिसमानाधिकरणस्य धूमाभावस्य प्र[illegible]योगितिसा

तद्व्यक्तिकी धूमाभावः २

साध्यतावच्छेदकेन दक

णीयसत्त्वविशिष्टयावद्धेत्वधिकरणांतर्भावेण प्रतियोगिसामानाधिकरण्यस्य सत्त्वस्य चितम्
ननु यावत्पदानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं परित्य
ज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैवाभावो विशेषणीयः तत्र व्याप्यत्वं च स्वव्या
पकतत्कत्वमतो नानुपपत्त्या वह्निमान् धूमादित्यादौ तत्तद्वह्न्यभावानां साध्यतावच्छेदक
व्याप्यप्रतियोगिताकानां तत्तयावदधिकरणीयसामानाधिकरण्यविरहेपि घटत्वादिनाव
ह्न्यभावमादाय [illegible]
येवलक्षणसंगतिः इत्थं च धूमवान्वह्नेरित्यादौ वाच्यत्वाद्यभावमादायनातिव्याप्तिसं
भवस्तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघटकत्वविरहात् एवं सति
हेतुसमानाधिकरणत्वविशेषणमनर्थकमिति चेत्तन्न तदा यत्र हि त्यज्यतामित्याशंका
परिहारायतत्प्रथाविधाभावनिवेशनेपि यत्रातिव्याप्तिस्तत्र यावत्पदस्य व्यावृत्तिमा
ह मानत एवेति मानत एव यावत्पदोपादानादेव द्वित्वावच्छिन्नाभावस्य भूतत्वम्

साध्यतावच्छेदकं

प्रतियोगिताक

7

राम

तादात्म्यं प्रकृते वह्नौ स्वीकृतत्वात् तेन संबंधेनैवात्यंतेरात्मत्वाभावस्य प्रतियोगिसामानाधिकरण्य
मक्षतमेवेति वाच्यम् अव्याप्यत्वादेः संबंधताविवादेन पदभावपदस्य पद व्याप्यत्वाद्य
भावपरताभ्युपगमस्यापि गंधप्रकृतितादृशलक्षणव्याख्यानात् तत्संबंधतापर्याप्तप्रामा
णिकत्वाभिप्रायेणो वात्र पत्सममानाधिकरण इत्युपादानात् यावत्पदासत्वे साध्यतावच्छेद
कैत्यादि विशेषणस्य व्यावृत्तिर्न संगच्छते यत्किंचिदभावमादायैव लक्षणसमन्वयसंभ
वात् अत स्वरमोक्षस्यापि यावत्पदस्य व्यावृत्तिं प्रदर्शयति सर्वत्रेति तथात्वा
त् प्रतियोगिसमानाधिकरणत्वात् तथा च यावत्पदोपादाने व्यभिचारिमात्र एवातिव्या उप
प्तिरिति भावः यथा व्यभिचारिस्थल एव दोषस्य कथनीतया सर्वत्र तादृशाभाव प
स्यत या च कथनमयुक्तम् तथापि यावत्पदानुपादानेऽतिव्याप्तिरेव नाव्याप्तिरिति
तत्सूचनाय सर्वत्रेत्युक्तम् अथवा सर्वत्र सर्वाधिकरणावच्छेदेन तथा चाविवक्ष

१.

चालिनीत्यापेन उत्पत्तिकालीवच्छेदेन वा साध्यवान्निष्ठाभावप्रतियोगितावच्छेदकत्त
याभूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमि
त्याशयेनाखंडव्याप्यवृत्तिम नोभेदाभावानुधावनमिति उक्तरीत्या अतएव वेत्यादिग्रं
थाव तारात् प्रथमतो वाच्यत्वाभावसाधकसर्वत्र व्यभिचारि एवेति व्याप्तेर्दर्शितत्वा
त् साध्याभावसाधकव्यभिचारिविशेषेऽतिव्याप्तिदर्शनं संदर्भविरुद्धमित्याशंकान
काश्च: केचित्तु यावत्पदानुपादाने वाच्यत्वादेरुदासीनपदार्थस्याभावसाधकव्यभि
चारि सामान्येऽतिव्याप्तिर्विशेषस्य तु साध्याभावसाधक काचिदति व्याप्ति:स्यात्साच(
यावत्पदोपादानान्न भवति इत्यभिप्रायकतया न संदर्भो विरुद्ध इत्याहुः परे तु ननु
साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकयावदभाव निवेशनैवोपपत्तेः सा
ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभाव निवेशनमफलं

राम

१.

त्त्वोभयत्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येपि मनसि मूर्तत्वाधिकर
णे मूर्तत्वरूपप्रतियोगिसामानाधिकरण्येपि तथात्व यावत्पदानुपादाने साध्य
तावच्छेदकव्याप्यप्रतियोगिताकतादृशोभयाभावस्यैव प्रतियोगिसमानाधिकर
स्या णतयातिव्याप्तिरितिभावः यावत्पदसत्त्वे यादृशाभावमादायातिव्याप्तिवारणं तत्ता
दृशाभावं दर्शयति मूर्तत्वमनोन्यत्वाभावस्येति मूर्तत्वाभावस्य मनोन्यत्वाभाव
स्य चेत्यर्थः एतयोश्चात् प्रतियोग्यसमानाधिकरणत्वात् यावत्पदेदत्ते साध्यताव
च्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान्धूमादित्यादौ तादृशयावदंत
र्गतमानसीयवह्न्याद्यभावमादायैवाव्याप्तिः स्यादिति प्रयोक्तविशेषणस्यैवो
मूर्तत्वमनोन्यत्वाभावयोरपि २ पादेयतया तादृशाभावयोरपि लक्षणघटकत्वात् इतिभावः मूर्तत्वस्य वह्निरि
क्तिपयपर्याप्त्या विशेषणगुणात्मकतया प्रतियोगिस्वरूपाणां तन्निष्ठप्रतियोगितानां
...नः स्या...

नाधिकरण्यविरहान्नातिव्याप्तिः साध्यतावच्छेदकावच्छिन्नव्यापकतापालक्षणेऽनिवेशेन
तादृशव्यापकताघटकसंबंधेन प्रतियोगिसामानाधिकरण्यनिवेशासंभवात् प्रतियोगिता
वच्छेदकसंबंधेनैव तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति वाच्यम् प्रतियोगिताव
च्छेदकसंबंधेन तत्सामानाधिकरण्यनिवेशेपि वह्निमान् धूमादित्यादौ हेतुसमानाधि
ता करणस्य वह्नित्वव्यापकप्रतियोगिकस्य पर्वतभिन्नभेदस्य प्रतियोगितावच्छेदकसंबं
धेन प्रतियोगिसामानाधिकरण्यं पर्वतांतर्भावेन नास्तीत्यव्याप्त्यापत्ता तेन संबंधेन
प्रतियोगिसामानाधिकरण्यस्य निवेशासंभवात् साध्यतावच्छेदकसंबंधेन प्रतियोगि
सामानाधिकरण्यमगत्या वाच्यम् तथा च मनोभिन्नभेदस्य तेन संबंधेन मूर्तत्वादि
रूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तिः साध्यतावच्छेदकसंबंधे
न प्रतियोगिसामानाधिकरण्यानिवेशे वक्ष्यमाणस्थलांतरेऽव्याप्तिः स्यादिति राम

घटत्वाभावव त्त्वमेयत्वात्तत्र नीलघटाणघटे की मूर्त्ताभावः पटत्वभेदः तत्सा साध्यतावच्छेदकविशेषणतासंबंधेन घटत्वाभावरूपप्रतियोगिसमानाधिकरणो भवत्येवेति २

तादृशप्रतियोगिताकत्वविशेषणव्यावर्तनीयस्य तत्तद्व्यक्त्यभावस्य वह्नित्वव्यापक
प्रतियोगिताकत्वाभावेनोक्तविशेषणेनापि व्यावर्तनसंभवादत आह अत एवेति
यत एव साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे यावत्त्वमुपा क
त्तं न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे अत एवेत्यर्थः भूतत्वेति ।।
साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे भूतत्वमूर्तत्वोभयवान् मूर्त
त्वादित्यादौ भूतत्वाभावमनोन्यत्वाभावप्रतियोगिताया उभयत्वाव्यापकतया उभय
त्वावच्छिन्नाभावादेरेव लक्षणघटकतयाऽतिव्याप्तिः स्यात् यथोक्तविशेषणाक्रां
ताभावनिवेशे च भूतत्वमनोन्यत्वाभावानामपि लक्षणघटकतया नातिव्याप्ति
रिति भावः न च साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेऽपि हेतुसमा
नाधिकरणस्य मनोभिन्नभेदस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसामा

वह्निर्णीयं तथाचोपमत्संभवइतिभावः साध्यप्रतियोगिकाभावनिवेशोपि गोत्वाद्यभाव
मादायासंभवस्यवारणसंभवात् ततस्साध्यव्यत्ययभावस्येति अस्यचनानाव्यक्ति
साधकेत्यादिः तथाच साध्याभावनिवेशे वह्निमान्धूमादित्यादावव्याप्तिःस्यादि
तिभावः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वंच साध्यतावच्छेदकाव
च्छिन्नसाध्यवह्निष्ठाभावप्रतियोगितानवच्छेदकत्वं गुणकर्मान्यत्वविशिष्टस
त्तावान्जातेरित्यादौ विशिष्टसत्ताव्यापिकतावच्छेदिकापाऽपि द्रव्यत्वाद्यभावीयप्र
तियोगितायानसाध्यवह्निष्ठाभावप्रतियोगितानवच्छेदकत्वं सत्तावतिगुण
दौ तादृशप्रतियोगित्वावच्छिन्नाभावसत्वादतोविशिष्टसत्ताद्यभावएवलक्ष
णघटकः तस्यचगुणादौसत्तादिरूपप्रतियोगिसमानाधिकरणत्वात् नातिव्या
प्तिरतः साध्यतावच्छेदकावच्छिन्नत्वोपादानं तथाचसतिद्रव्यत्वाद्यभावप्रति

राम

तु नास्माकं दोष इत्याभिप्राय इति व्याचख्युः तन्न समीचीनं तथा प्रतिभाति साध्यताव
च्छेदकेत्यादि विशेषणव्यावृत्तेः पक्षारुह्यमाणतया तदुत्तरमेव साध्यतावच्छेदकाव
च्छिन्नेत्यादि विशेषणस्यानेन साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविशेषणं
किं नोपात्तमित्याकांक्षोदयादादावेव तादृशविशेषणस्यागवीजकथनस्यासंगतत्वा वनी
दिति गोत्वाद्यभावस्येति प्रतियोग्यसमानाधिकरणत्वादित्यग्रे केनान्तय्या त्वादित्य
नेनान्वयः तस्याच साध्यतावच्छेदकेत्याद्यनुपादानेऽसंभवइतिभावः यद्यपि गो
त्वाद्यभावादेरपि पूर्वलक्षणघटितविशिष्टस्याभाववत्त्वप्रतियोगिसामानाधिकर
ण्यं पर्वतादावप्यास्ति तथापि व्यापकतायाः लक्षणघटकत्वे भाववत्त्वप्रतियो
गिसामानाधिकरण्यं धूमवान्वह्नेरित्यादौ धूमाभावादेः पूर्वलक्षणघटितत्वादि
विशिष्टस्याभावीयप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिवारणायावश्यं वि
रू

स्व
विषयतासंबंधेनघटत्वेन
प्रमाभावीलक्षीरणघटकस्य।

पूर्वमत्वावच्छिन्नप्रकारतानिरूपित...

त्वं वस्य च न विवक्षणीयत्वात् साध्यतावच्छेदकसंबंधेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्र
तियोगित्वावच्छिन्ननिष्ठव्यापकतापर्यवसितसंबंधेन स्वविशिष्टप्रावच्छेदत्वाधिकरणे
प्रतियोगिसामानाधिकरण्यं साध्यतावच्छेदकसंयोगादिसंबंधावच्छिन्नसाध्यनिष्ठव्या
प्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकतायां संयोगादिसंबंधावच्छिन्नत्वप्रमादिप्रका
रतानिरूपितविशेष्यतासंबंधस्यापि घटकतया तेन संबंधेनाप्रयोजकालकादेः प्रतियोगि
नोऽसत्वात् इति वाच्यं यतो विषयतायाः विषयतात्वेनैव संबंधता प्रामाणिकी ननु
तत्तद्वि विषयतात्वेनेति परं तु एतादृशांदिशासमवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहे
ताववेवातिव्याप्तिवारणं संभवति तत्र ज्ञानाभावस्य संबंधसामान्येन साध्यनिष्ठव्या
प्यतानिरूपितविषयतासंबंधघटितव्यापकतावच्छेदकप्रतियोगिताकस्य साध्य
तावच्छेदकसंबंधेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताप

ना॰ श्यामका
१२७

रान

योगितापाऽपि विशिष्टसत्तात्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतया ता
दृशाभावादीनां गुणादावतथात्वान्नातिव्याप्तिः यत्किंचिद्रूपावच्छिन्नसाध्यवत्तानि
वेशे च सत्तावान्जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदकप्रतियोगिताकद्रव्यत्वा
भावादिकमादायाव्याप्तिर्बोध्या साध्यवत्त्वं साध्यतावच्छेदकसंबंधेन बोध्यम् अन्यथा
धूमवान्वह्नेरित्यादौ धूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायां कालिकवि
शेषणताविषयितादिसंबंधेन धूमादिमति काले ज्ञानादौ च संयोगादिसंबंधेन स्वाव
च्छिन्नाभावसत्त्वात् न केनापि संबंधेन व्यापकतावच्छेदकत्वमिति केवलान्वयिवाच्य
त्वादिनिष्ठप्रतियोगितैव स्वरूपादिसंबंधघटितव्यापकतावच्छेदिका स्यादित्यतिव्या
प्तिः न च संबंधसामान्येन धूमादिमन्निष्ठो योऽभावस्तदीयविषयतासंबंधावच्छिन्न तम
प्रतियोगितानवच्छेदिका या प्र[illegible]मान्निष्ठप्रतियोगिता तन्निरूपकप्रमाम

प्रमात्मतामात्मनिष्ठप्रतियोगिता १

संबंधसामा
न्येन साध्य
वन्निवेशो

प्रतियो
त्वावच्छि
न्नावसत्व

योगिसामानाधिकरण्यघशरीरे व्यापकतायाः स्वातंत्र्येण निवेशस्य प्रातिदैप्यत्वात् ज्ञानवान्द्रव्यत्वा
दित्यादावतिव्याप्तिरस्येवेति ध्येयं वस्तुतस्तु संयोगसमवायादिनाधारणानुगतसंबंधत्वस्यैकं
यंचित्तुवचत्वेपि तेन रूपेण संयोगादीनां संसर्गतयाभानस्य निर्युक्तिकत्वात् व्यापकताशरीरे ला
घवान्तरोधात्साध्यप्रकारेणाधिकरणस्य निवेशे साध्यसंबंधो विशिष्यसंसर्गतयानिवेशनीयः
तथाच विशिष्यसाध्यतावच्छेदकसंबंधनिवेशनमावश्यकं यत्किंचित्संबंधेन साध्यवत्ताया व्या
पकताघटकत्वे तु वन्हिमान्धूमादित्यादौ विषयितादिसंबंधेन साध्यवतिगुणत्वाद्यभावप्रतियो
गितायाः अपि व्यापकतावच्छेदकतया तादृशाभावस्य लक्षणघटकत्वे तस्य च पर्वतादौ प्रति
योगिसामानाधिकरण्यविरहादसंभवो बोध्य इति साध्यतावच्छेदकसंबंध एव संसर्गतया विशि
ष्यनिवेश्यः साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वानिवेशे संबंधस्यैव साध्यवान्निष्ठ

विशिष्टप्रतीतिनियामकत्वेन २

विषयितासंबंधेन वन्हिसमानाधिकरणस्य घटे विगुणत्वाभावस्य ३

ज्ञानादौ

तस्मादेव १

राम

टकघावत्संबंधांतर्गतसमवायेन घटादौ प्रतियोगिसामानाधिकरण्यविरहादिति न च संबंध
सामान्येन धूमादिमान्निर्धूमो वा वह्नेरित्यादौ यः संबंधसामान्यावच्छिन्नप्रतियोगिताकधूमाभा
भावीयसंबंधसामान्यावच्छिन्नप्रतियोगित्वमप्यनवच्छेदकं संयोगत्वावच्छिन्नसंयोगादिसं
बंधेन धूमादेर्धूमादिमत्यभावसत्वेपि संबंधत्वरूपव्यापकधर्मावच्छिन्नसंयोगसंबंधाव
च्छिन्नप्रतियोगिताकतदभावासत्वात् तथा च धूमाद्यभावस्यापि लक्षणघटकत्वपात
स्य च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितत्वप्रतियोगित्वाव
च्छिन्नव्यापकताघटकसंयोगत्वावच्छिन्नसंयोगादिसंबंधेन प्रतियोगिसामानाधिकर
ण्यविरहान्नातिव्याप्तिरिति वाच्यम् संबंधत्वेन संबंधानामभावप्रतियोगितावच्छेदक
संबंधत्वे मानाभावात् तेन रूपेण संबंधानां व्यापकताघटकत्वासंभवात् वस्तुतस्तु साति

संबंधसामान्ये नावस्मानका लीनपदार्थ स्याभावः २

संबंधसामान्येन धूमादिमति ४

संबंधसामान्ये नघटकेन धू माभावीयः २

घवच्छिन्नाभावविषयेपि एषः द्रव्यं नास्तीत्याकारकप्रतीत्यापत्तेः तदवच्छिन्नानिरूपितानुयो
गितायाएव संसर्गतयाभ्युपगमात् व्यापकत्वावच्छिन्नविशेषिताभावस्य लक्षणघटकत्वेनि
वेशे व्यापकत्वावच्छिन्ननिरूपितानुयोगितायाः संबंधविधयानिवेशनीयतया सद्धेतौ
हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्यव्यापकाभावस्य संबंधविशेषावच्छिन्नप्रतियोगिता
कस्य कथंचित्प्रसिद्ध्यालक्षणासमन्वये पि व्यभिचारिण्यतिव्याप्तिः व्यभिचारनिरूपकाधिकरणे
पिकस्यचित्साध्यव्यापकस्य वृत्तेः अधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तिश्चे
तिएवमनवच्छेदकपदेनावच्छेदकतापर्याप्त्यनधिकरणत्वमवश्यं वाच्यं अन्यथा द्रव्य
त्वाभावादेरपि वह्निमान्निष्ठपूर्वलक्षणवृत्तित्वविशिष्टद्रव्यत्ववच्छेदप्रतियोगिताव
च्छेदकद्रव्यत्वप्रतियोगिकत्वात् लक्षणघटकत्वापत्तेः तथाच घटत्वावच्छिन्नघटा
भावादेरपि लक्षणघटकत्वापत्तिः वह्निनिष्ठभेदप्रतियोगितायाः घटत्वविशिष्टप
वच्छेदकता।

त्वविशिष्टपावच्छे
त्वधिकरणेप्याव
त्यतियोगिकाभा
मादिकरणत्ववि
शेषणेनविशेषा
ननातिव्याप्तिः

विषयिताभाव
भावच्छिन्नप्रति
योगिताकस्य

वाधिकरणे संवं
भावच्छिन्नाभाव
दपि लक्षणत्वम
न्वये व्यधिकरण
धर्मावच्छिन्नाभावस्य
वस्य लक्षणघट
कत्वं नस्यात्

कत्वाने विषयितासंबंधेन जलत्वाद्यभावप्रतियोगितापर्याप्तेस्तद्दशाभावस्य लक्षणघ
टत्वापातात् विषयितापर्याप्त्यानियामकतयाएतद्दोषानवकाशइतिचेत् एवमपि एतद्वह्नि
मान् एतद्धूमात् तद्रूपवान् तद्रसात् इत्यादौ जलत्वाद्यभावप्रतियोगितायाः कालिकसंबं
धेन साध्यव्यापकसाध्यवत् समानाधिकरणकर्म्मादौ वर्तमानतया लक्षणघटकत्वात्
तथाचव्यापकनिरूपितवृत्तौ स्वरूपसंबंधावच्छिन्नत्वनिवेशस्यैतन्मते व्यावश्यकतया
नलाघवावकाशः विपरीतमेव गौरवमापेयत्वांशानिवेशाधिक्येनेति नच व्यापकानिष्ठ
प्रतियोगिताकत्वेनाभावेन निवेनीयो येनोक्तं गौरवं स्यादपि त्वनुयोगितासंबंधेन व्या
पकाविशेषित एव तत्र च व्यापकतावच्छेदकप्रतियोगिताकत्वेनाभावनिवेशापेक्ष
या लाघवमक्षतमेवेति वाच्यम् प्रतियोगिविशेषणतापन्नधर्मावच्छिन्नानिरूपित
त्वानवच्छिन्नानुयोगितायाः अभावांशे प्रतियोगिसंबंधतया भानेयत्रादौ प्रतियोगिघटत्वा

जलत्वाभावस्य १

नहितत्रसमानाधिका
लोयाधेः किंतु कि
कालान्तरे ऽस्तः का
लिकसंबंधेन जल
त्वाभावप्रतियोगित्वं
पर्वतनिष्ठकर्मादौ व
र्तते न वच्छेदकनिष्ठ
प्रतियोगितानिरूप
कत्वं जलत्वाभावस्य
निरूपितोर संभवः स्यात् ४

भावमानधर्मावच्छि
न्ननिरूपितत्वा
वच्छिन्नानुयोगि
तायाः अभावांशे
प्रतियोगिसंबंधता
भवति २

ग.टी.

१७

कत्तया वाच्यत्वादिनिष्ठप्रतियोगितायां व्यापकतावच्छेदकतयातिव्याप्त्यापत्तेः दैशिकविशेष-
णतासंबंधेन तन्निष्ठं निवेशो भावस्य तेन संबंधेन वृत्तेरप्रामाणिकतया वाच्यत्वमादि
त्यादोषपर्वतत्वाद्यभावनिष्ठप्रतियोगितायाः व्यापकतावच्छेदकतापत्त्या पर्वतत्वाधा
त्मकाभावस्यापि लक्षणघटकत्वापातात् हेतुसामानाधिकरण्यघटकाभावीयवृत्तावपि
तादृशसंबंधावच्छिन्नत्वनिवेशो नानास्याने तादृशसंबंधनिवेशेन प्रतियोगितानवच्छेदक
त्वमित्यत्र च व्यापिकारणधर्मावच्छिन्नाभीयप्रतियोगितावच्छेदकता कारणप सामाना
धिकरण्यप्रत्यासत्त्यवच्छिन्नत्वनिवेशो न च गौरवात् अभावे प्रतियोगिवैय्याधिकरण्यनि
वेशनमेवोचितं व्याधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणतयैवतमा
दाय दोषासंभवादेतन्मते ऽवच्छेदकतायाः सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्यानि
वेशात् अभावीयवृत्तौ संबंधभेदानिवेशाच्च लाघवं प्रतियोगिवैय्याधिकरण्यं च न

प्रतियोगिव्य धिकरणाभा वेलक्षणघट काभावेच ४

वत्त्वाभावप्रतियो गिकेन घटनाभा वस्य ३

प्रतियोग्यधि करणोत्पन्नवि वर्तमाननत्वाद्य

र्याप्ततयाद्युक्तपटस्य तंतुपर्याप्त्यनधिकरणत्वात् अथ यानि हि तत् व्यापकतावच्छेदकतायां निवेशे कपिसं
योगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकतानुपपत्तिः कपिसंयोगा
भावादिनिष्ठतत्प्रतियोगितानां साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावप्रतियोगितावच्छेदक-
त्वादिति यदि तत्संबंधविरोधः नच व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणसत्वा
त् साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकतेति वाच्यम् प्रकृ
त व्यापकतायां तादृशविशेषणप्रवेशस्य निष्प्रयोजनकत्वात् अत्र केचित् व्यापकता
लक्षणेऽभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यकं अन्यथाऽभावे संबंधसामान्येन
साध्यवन्निष्ठत्वानिवेशे कालपरिमाणवान् द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रतियोगि
तामात्रस्यैव कालिकसंबंधेन साध्यवद्वृत्तितया स्वावच्छिन्नाभाववत्तत्प्रतियोगितावच्छेद

गा

अत्यंताभावघटितव्यापकतायाः १

व्यापकताघटकाभावे ३

ग॰ व्य॰

व्यापकतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणसाध्य
वन्हिष्ठाभावस्य व्यापकतावच्छेदकत्वे १

१८

न चैवं दैशिकविशेषणतासंबंधस्य क्वापि व्यापकतावच्छेदकत्वं न स्यात् सर्वस्यै
वाभावस्य पूर्वदलेन वृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनः तेन संबंधेन साध्यव
तिवृत्तेः तेन संबंधेन प्रतियोग्यनधिकरणीभूतसाध्यवन्हिष्ठाभावाप्रसिद्धेः न च
तादृशसंबंधस्य व्यापकतावच्छेदकत्वेपि तन्निविरहः सासान्यादिमात्रवृत्तिसाध्य
कस्थलेपि विषयतासंबंधघटितव्यापकतावच्छेदकप्रतियोगिताकसाध्यवत्व

सत्ताभाववानृजात
भावात् इत्यादौ प

प्रकारकप्रमाभावमादायैवोपपत्तिसंभवादिति वाच्यम् तादृशसंबंधस्यानत्या

भाव

त्वे तेन संबंधेन कालिकसंयोगादिसाध्यकप्रमेयत्वादिहेतुकस्थले तन्निष्ठकपि
संयोगाद्यात्मकाभावीयप्रतियोगितायां व्यापकतावच्छेदकत्वानुपपत्त्यात्र ग्रि
मग्रंथासंगतितादवस्थ्यात् इति चेन्न लाघवानुरोधेन येन संबंधेन यादृशप्रतियो
गितावच्छेदकविशिष्टानधिकरणं साध्यवत् तादृशप्रतियोगितानवच्छेदकत्वमेव तादृश

राम

करण

प्रतियोगिसमानाधिकरणभिन्नत्वं तथासति [illegible] त वह्निसंयोगाद्यभावस्य प्रतियोगि
समानाधिकरणतया अभावांतरमादाय तत्र वह्निसंयोगादिनिष्ठ प्रतियोगितायाः अपि
वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकतापत्त्या तदभावमादायाव्याप्त्यापत्तेः किंतु
प्रतियोग्यनाधिवृत्तित्वं तथा च प्रतियोग्यनधिकरणीभूत साध्यवन्निष्ठाभाव इत्यभावां·
तार्थनिष्कर्षः अत्र च व्यापकताघटकत्वेनाभिमतो यः संबंधस्तेन प्रतियोग्यनाधि
करणत्वं वाच्यं तेन कालपरिमाणादिसाध्यकस्थले संबंधसामान्येन प्रतियोग्य
नाधिकरणसाध्याधिकरणाप्रसिद्धावपि न क्षतिः सर्वे वा न कालपरिमाणादित्या
दौ साध्यतावच्छेदककालिकसंबंधेन प्रतियोग्य नाधिकरणसाध्याधिकरणाप्रसि
द्धा तादृशसंबंधस्य व्यापकताघटकत्वासंभवेपि न क्षतिः तत्र समवायादिसंबं
धघटित व्यापकतावच्छेदकप्रतियोगिताक घटत्वादिना द्रव्यत्वाद्यभावमादायैव

कालपरिमाणका
कालत्वान्तुत्वादौ

करणत्वमादाय व्यापकतालक्षणसामंजस्यमितिवाच्यम् तादृशाभावानामभेदे घटो ना
स्तीत्यादिप्रतीतीनामपि घटत्वादिविशेषितघटादिवृत्तित्वेन यावत्त्वमेयनिष्ठप्रतियो
गित्वावगाहित्वात् घटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वात् समनिय
ताभावानामभेदानभ्युपगमेऽपि साध्याभावादिप्रतियोगितया साध्यवदवृत्तियदा
र्थाभावस्यप्रतियोगितामादाय तादृशप्रतियोगितानां व्यापकतानवच्छेदकतया निवा
रणाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकम् अथद्र
व्यत्वाद्यभावीयद्रव्यत्वनिष्ठप्रतियोगितानामपि संयोगादिव्यधिकरणसंबंधघटित
व्यापकतावच्छेदकत्वापत्तिः संयोगादिना तादृशप्रतियोगितात्मकप्रतियोगितावच्छे
दकविशिष्टाधिकरणप्रसिद्ध्या तादृशप्रतियोगितेत्यत्र तादृशप्रतियोगितावच्छे दाम

इत्थं च कपिसंयोगा भावादिसाधकस्थले तन्निष्ठप्रतियोगित्वावच्छिन्नप्रतियोगितानो॰
क्त यादृशापदेनोपादातुं शक्यते तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य
भावइ साध्यवत्यसंभावात् किंतु घटत्वाद्यनिष्ठप्रतियोगितेव दैशिकविशेषणतया तदवच्छे
दकावच्छिन्नानधिकरणत्वस्य साध्यवति घटादौ सत्वात् तदनवच्छेदकत्वं च कपि
वा संयोगाभावादिनिष्ठप्रतियोगिताया इति कपिसंयोगादेर्दैशिकविशेषणताघटित
व्यापकतावच्छेदकप्रतियोगिताकत्वानिर्वाहः समनियताभावैक्यमते घटाघभा
वानामपि घटत्वादिना प्रमेयसामान्याभावाभिन्नतया प्रमेयमात्रप्रतियोगिकत्वे
न प्रतियोग्यनधिकरणीभूतसाध्यवतोऽप्रसिद्धिरतो प्रतियोगितावदनधिकर
णत्वं विहाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशः ननु घटाघ
भावानां प्रमेयमात्रप्रतियोगिकत्वेपि तदीयघटादिमात्रप्रतियोगितावदना॰

व

वस्तुतस्तु लघुरूपसमनियतगुरुधर्मस्यानवच्छेदकत्वम् घटाद्यभावप्रतियोगिताया अपि वन्ह्या
दिव्यापकतावच्छेदकत्वापत्तिः तादृशप्रतियोगिताविशिष्टघटाद्यभावप्रतियोगिताया ऐ
क्येन घटत्वादेरवच्छेदकतया घटाद्यभावीयप्रतियोगितानां तदनवच्छेदकत्वात् न च
प्रतियोगितायास्तत्तदभावीयप्रतियोगितात्वेनावच्छेदकतायां गौरवेऽपि स्वरूपतोऽवच्छे
दकत्वे विशेषः प्रतियोगितायाः स्वरूपतो भानाभावे न तेन रूपेणावच्छेदकताया असं
भवात् इति पारिभाषिकमवच्छेदकत्वं व्यापकताशरीरे निवेशनीयम् तथा च साध्यवन्निष्ठाभाव
प्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नाभाववद्वृत्तिस्वविशिष्टसामान्यकत्वं फलितः
साध्यवत् यत्किंचिद्घटत्वसंबद्धस्वविशिष्टसामान्यकं पर्यवसितं तदन्यत्वमेव व्यापकतावच्छे

२७

२८

न्तायाः प्रतियोगिताया उपादातुमशक्यतया प्रतियोगितांतरमादाय तत्रानवच्छेदकत्वांत
सत्वात् तथाच यावद्व्यापकतावच्छेदकसंबंधांतर्गतसंयोगादिना द्रव्यत्वाद्यभावस्य प्रति
योगिसामानाधिकरण्याप्रसिद्ध्यासंभवः न च संयोगादिना द्रव्यत्वाभावस्य स्वसमनियतघ घ
टत्वाद्यवच्छिन्नप्रतियोगिताकवन्ह्याद्यभावाभिन्नतया संयोगादिना वन्ह्यादिरूपप्रतियो
गिसामानाधिकरण्यप्रसत्वात् नासंभव इति वाच्यम् एवमपि सत्तावंज्जातेरित्यादौ हेत्वधि
करणावच्छेदेन तादृशाभावानां संयोगेन प्रतियोगिसामानाधिकरण्यासंभवेनाव्याप्तेरुद्धारत्वा
त् मैवम् व्यापकतावच्छेदकत्वेनाभिमतो यः संबंधस्तेन संबंधेन वृत्तिमन्निष्ठत्वेन प्रतियो
गितायाविशेषणीयत्वात् द्रव्यत्वादेः संयोगादिनाऽवृत्तितया उक्तदोषानवकाशाऽऽत्याहुः

अनवच्छेदकप्रति
योगितायाः

ग॰ व्या॰
२१

वद्वृत्तीयप्रतियोगिसामानाधिकरण्यविरहेपि नव्याप्तिः नाव्याप्तिः वन्हिमान्धूमादित्यादौ धूमा
वयवादिवृत्तेर्वन्हित्वावच्छिन्नाभावस्यस्वविशिष्टहेतुतावच्छेदकसंबंधेनहेत्वधिकर
णेतदवच्छेदेनप्रतियोगिसामानाधिकरण्यसंभवत्येव तथाविधहेत्वधिकरणेपिपर्वतादे
र्जन्यमात्रस्यकालोपाधितयाकालिकसंबंधेनतादृशाभाववविशिष्टत्वात् तदंतर्भावेन
तेनसंबंधेनतादृशप्रतियोगिसामानाधिकरण्यस्यापिसत्वाच्च अभाववैशिष्ट्यादौसंबंध
स्यविशिष्टस्यानिवेशादित्यभिप्रायेणनित्यमात्रवृत्तिहेतुकस्यलानुधावनं अथवन्हिव्या
पकं चरमक्रियाभावस्यपोऽभावश्चरमक्रियात्मकस्तस्यकालिकसंबंधेनहेत्वधिकर
णेमहाकालेवर्तमानस्यनाविवक्षणीयप्रतियोगिसामानाधिकरण्यसंभवस्तद्विशिष्टस्यहे
तुतावच्छेदकसंयोगेनधूमाधिकरणस्याप्रसिद्धेः धूमाधिकरणपर्वतादेस्तदसमानका
लीनतयातत्रकालिकसंबंधेनापितद्वैशिष्ट्यासंभवादिति आत्मत्वपर्यंतानुधावनम

साध्यक

दकत्वम् तथा च कपिसंयोगाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक
प्रतियोगितावत्त्वमनायासेनैव निर्वहति यतः कपिसंयोगाद्यभावनिष्ठप्रतियोगिता विशिष्ट
स्वसर्वत्रैव साध्यवति वर्त्तते तस्याश्च स्वपदेन उपादातुमशक्यत्वात् तादृशसंबंधांतरमेव प्रतियोगितांतरमेव र
तद्रूपत्वं च तादृशप्रतियोगितायामस्तीति असंबद्धत्वशरीरे व्यापकतापर्याप्तिकत्वेनाभि
मतो यः संबंधस्स एव निवेशनीयः कृत्स्नत्वादिनिष्ठप्रतियोगित्वं च संयोगादिसंबंधेन साध्य
वदसंबद्धत्वविशिष्टसामान्यकमेवातो न संयोगादिघटितव्यापकतावच्छेदकत्वं तस्येति नो
क्तदोषावकाश इति दिक् येन संबंधेन हेतुरिति व्याप्यतापर्याप्तिकत्वेनाभिमतो यः संबंध इत्य
र्थः वोध्यमित्यस्य हेतुसामानाधिकरण्यघटकमित्यादिः तेन तादृशसंबंधपविवक्षणेन आ
त्मत्वे साध्य इति अयमात्मा ज्ञानादित्याद्यवित्यर्थः साध्याभावस्य साध्यतावच्छेदकावच्छिन्न
साध्याभावस्य आतथात्वेपि स्वविशिष्टहेतुतावच्छेदकसंबंधेन हेत्वधिकरणस्याप्रसिद्ध्यावि

स

त्वनिष्ठध्वंसाधेयत्वानियामककालेपि ध्वंसस्य तेन संबंधेन कालवृत्तित्वमस्त्येवेत्यस्यापि तु वच
नाद्धि वह्निमान् धूमादित्यादौ साध्याभाववदादेयत्नाव्याप्तिसंभवः किंतु चरमनिपातमकाभा
वमादायैवाव्याप्तेः स्फुटतरप्रतिपत्त्यर्थं मात्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चे
ति ननु ज्ञानवान् आत्ममहाकालान्यतरत्वादित्यादौ हेतुसमानाधिकरणानां साध्यताव
च्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेव तत्त्वविशिष्टहेत्वधि
करणे महाकाले कालिकसंबंधेन प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिः न च तादात्म्येन
ज्ञानव्यापकस्यात्मनोऽभाव एव कालेन प्रतियोगिसमानाधिकरणः आत्मनोऽवृत्तितया का
ले कालिकसंबंधेनापि अवृत्तेरिति वाच्यम् आत्मनः कालावृत्तित्वे कालवृत्तित्वघटित
कारणत्वाद्यनुपपत्त्या तदुपगमस्यावश्यकत्वात् नित्यद्रव्याणां कालावृत्तित्वेपि महाका
लभिन्नोद्भवत्वात् ईश्वरज्ञानभिन्नगुणत्वात् इत्यादावतिव्याप्तिः इति मत्तामेव महाकाल राम

31

पर्वतो वह्निमान् तादा
त्म्येन धूमवत्त्वात्

न च वृत्त्यनियामकसंयोगेन धूमसंबंधिनि परमाणावेव चरमक्रियावैशिष्ट्यस्य प्रसिद्ध्या
चरमक्रियाभावरूपप्रतियोगिनोऽपि सत्त्वेन संभवत्येव विवक्षणीयप्रतियोगिसामानाधि
करण्यं तादात्म्यसंबंधावच्छिन्नहेतुकस्थलानुरोधेन हेत्वधिकरणावच्छेदेनेत्यत्र हेतुसंबं
धित्वमात्रस्यैव विवक्षितत्वादिति वाच्यम् यादृशपरमाणौ कदापि धूमसंयोगो नासीत्तदी
यचरमक्रियात्मकाभाववैशिष्ट्यस्य हेतुसंबंधिन्यसत्त्वेन तमादायैवाव्याप्तिसंभवादिति
चेन्न महाकालस्यैव वृत्त्यनियामकसंयोगसंबंधेन हेतुसंबंधितया तत्र कालिकसंबंधेन
चरमक्रियात्मकाभाववैशिष्ट्यस्य दैशिकविशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीय
प्रतियोगिसामानाधिकरण्यसंभवात् वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छे
दकसंबंधत्वात् न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थलेऽव्याप्तिरस्त्येवेति
वाच्यम् तेन रूपेण संबंधताया मानाभावात् कालस्य वृत्तितया काले धूमसंयोगस्य का

व्यापकत्वादित्यादौ हेतुसमानाधिकरणानित्यज्ञानत्वाद्यभावस्य प्रतियोगिनः साध्यं प्रति विशेषि
तादिसंबंधेनापि व्यापकतया तेन संबंधेन हेत्वधिकरणे ईश्वरेच्छाकृत्योः प्रतियोगिसामाना
धिकरण्येनातिव्याप्तिः येन येन तु संयोगेन च तत्पावि धसमवायादिसंबंधेनातथात्वान्नातिव्याप्तिः
साध्यतावच्छेदकावच्छिन्ननिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसंबंधे
न तादृशसंबंधस्य प्रतियोगिसामानाधिकरण्यघटकशरीरे न स्वातंत्र्येण निवेशस्तथास्त्वभावे
साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्यात् न हि
तादृशविशेषणानुपादाने गोत्वाद्यभावमादायासंभवः संभवति गोत्वाद्यभावानामपि हेत्व
धिकरणे पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनिष्ठव्यापकताघटकदैशिक
विशेषणतासंबंधेन प्रतियोगिसामानाधिकरण्यसत्त्वात् धूमवान्वह्नेरित्यादौ धूमाभा
वस्यायोगोलके पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकर

भेदेश्वरज्ञानभेदव्यापकतया तदभावानां यावत्तामेव महाकाले ईश्वरज्ञानादौ कालिकविशे-
षणताविषयितासंबंधघटितप्रतियोगिसामानाधिकरण्यसत्त्वादित्यत आह एवं दलांतरेपीति
दलांतरे प्रतियोगिसामानाधिकरण्यघटकप्रतियोगिमत्तादले संबंधभेदनिबंधनो दोषः
कालिकादिसंबंधभावाद्याप्तिव्याप्तिरूपः संबंधैक्यविवक्षया व्यापकताघटकसंबंधप्रतियो-
गिमत्ताघटकसंबंधयोरैक्यविवक्षया तथा च ज्ञानवानात्ममहाकालान्यतरत्वात् म-
हाकालाभिन्नो द्रव्यत्वादित्यादौ साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठव्याप्यतानि-
रूपितव्यापकताघटकसमवायदैशिकविशेषणतादिसंबंधेन ज्ञानाभावमहाकालभेदा-
भावादिप्रतियोगिनां कालादावव्रत्तेर्नातिव्याप्तिरिति भावः अत्र च येन येन संबंधेन
स्वप्रतियोगित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नव्यापकता तेन तेन संबंधेन प्रति-
योगिसामानाधिकरण्यमवश्यं विवक्षणीयम् अन्यथा इदं नित्यज्ञानं नित्यत्वे सति सवि-

द्रव्यत्वत्वादिना द्रव्यत्वादेरभावस्य समवायादिसंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगि
ताकस्य साध्यतावच्छेदकसंयोगसंबंधेन प्रतियोगिसामानाधिकरण्यविरहेपि न क्षतिरिति त
न्न तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये कालवृत्तिहेता
वतिव्याप्त्यापत्तेः तत्र महाकालान्यत्वविशिष्टघटाभावमहाकालान्यत्वाभावादीनां कालि
कसंबंधेन महाकाले घटादिरूपप्रतियो[गि]सामानाधिकरण्यसत्वात् यदि च महाकालान्यत्ववि
शिष्टोपि घटो महाकाले वर्त्तते अन्यथा सिद्धांतलक्षणे महाकालो घटवान् कालपरिमाणादित्या
दौ महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य सुलभतया उभयाभावघ
टितप्रतियोगिवैयधिकरण्यनिर्वचनायासस्य निष्प्रयोजनकत्वापत्तेरिति दर्शितावशिष्ट
साध्यकस्थले कालत्वादिः सद्धेतुरेवेति मन्यते तदापि घटत्वाभाववान् प्रमेयत्वादित्या
दौ घटत्वात्मकाभावस्य साध्यतावच्छेदकदैशिकविशेषणतासंबंधेन किंचिद्विशिष्टत्वा

स्वप्रतियोग्यनधिकर
णीभूतहेत्वधिकरण
वृत्तेः ।

रूपेयियावद्व्यापकताघटकसंबंधेनतर्गतिसंयोगादिनाप्रतियोगिसामानाधिकरण्यविरहात्
घटत्वाद्यभावान् प्रमेयत्वादित्यादौ घटत्वात्माकाभावस्य तादृशप्रतियोगिसामानाधिकरण्ये
पि विशेष्यतासंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य घटावृत्तेर्घटत्वाभा(
वादिप्रमापास्तिर्दृशसंबंधेनाभावस्ययावद्व्यापकताघटकसंबंधान्तर्गततादृशसंबंधेनप्र
टे प्रतियोगिसामानाधिकरण्यविरहादिति व्याप्यनवकाशात् अपि साध्यतावच्छेदकावच्छि तु
न्न निरूपितयत्संबंधघटितव्याप[illegible]तावच्छेदकप्रतियोगिताकायेऽभावास्तत्तत्सं
बंधेनप्रतियोगिसमानाधिकरणा एवंक्रमेणैव निवेशात् व्यापकतायामेकदेवलक्षणे
निवेशइति यत्तु साध्यतावच्छेदकसंबंधेनप्रतियोगिसामानाधिकरण्यनि वेशान्नज्ञान
वानामसमहाकालान्यतरत्वात् इत्यादावतिव्याप्तिः इत्थं च व्यापकतापि साध्यतावच्छेद
कसंबंधघटिताग्राह्या अतीव निःमान्धूमादित्यादौ घटत्वादिना घटवत्तित्वविशिष्ट